द्वादशः पाठः

12

Lesson – 12

# विश्वशान्तिः

सुखदुःखात्मके जगति न हि कोऽपि दुःखम् इष्टत्वेन काम्यते। अतः दुःखनिरोधः कथं सम्भाव्यते?। तस्य एक एवोपायः वर्तते – "भुवने शान्तेः सद्धर्मस्य च संस्थापना द्वारा विश्वशान्तिं वर्धयितुं शक्नुमः।



शान्तिस्तु न केवलं एकस्य जनस्य, न च एकस्य कुटुम्बस्य ग्रामस्य एवं नगरस्य। किन्तु सर्वस्यापि जगतः आवश्यकी खलु।

एषा विश्वशान्तिः स्वार्थप्रार्थना , परार्थप्रार्थना इति द्विविधा। आत्मनः शान्त्यर्थं या प्रार्थना क्रियते सा स्वार्थप्रार्थना। जगतः शान्त्यर्थं या प्रार्थना क्रियते सा परार्थप्रार्थना इत्युच्यते।

स्वार्थप्रार्थनायाः अपि परार्थप्रार्थनायाः शक्तिस्तु अधिका भवति। अस्यां प्रार्थनायां हि विश्वप्रेम, विश्वसौहार्दता च भवतः। अत्र वेदेषु विद्यमानान् सुप्रसिद्धान् केचन शान्तिमन्त्रान् उदाह्रियन्ते-

ओम्॥ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येम अक्षभिर्यजत्राः।
स्थिरैः अङ्गैः तुष्टुवांसः तनूभिः। व्यशेम देवहितं यदायुः।
स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नः तार्क्ष्यो अरिष्ठनेमिः। स्वस्ति नो बृहस्पतिदर्धातु॥

॥ ओं शान्तिः शान्तिः शान्तिः॥



Unit 12.indd 79 06-06-2018 12:45:21

अस्य मन्त्रस्य तात्पर्यार्थः –“भो ! देवताः, मानवाः वयं सदा मङ्गलां शुभां कल्याणीमेव वाचं शृणुयाम । सर्वदा मङ्गलानि वस्तूनि एव पश्येम। आरोग्यसम्पन्नः सन्तः वयं सर्वदा अपि स्थिरैः इन्द्रियैः देवान् युष्मान् प्रीतिं कुर्मः । भगवता यावदायुः दत्तमस्ति तावदपि सन्तोषेण आनन्देन यापयाम । इन्द्रादयः देवाः सदा अस्मभ्यं मङ्गलं कुर्वन्तु ।

शान्तिमन्त्रेऽस्मिन् सर्वत्र बहुवचनप्रयोग एव दृश्यते। सर्वत्र शृणुयाम, पश्येम, व्यशेम, कुर्मः, नः इति सामूहिकप्रार्थना कृता अस्ति। अनेन विश्वशान्तिः विश्वकल्याणं च भवतः एव ।।

अन्यः सुप्रसिद्धः यजुर्वेदमन्त्रः एवं वदति –

सह नाववतु ।

सह नौ भुनक्तु ।

सह वीर्यं करवावहै ।

तेजस्विनावधीतमस्तु ।

मा विद्विषावहै ।

।। ओं शान्तिः शान्तिः शान्तिः।।

मन्त्रोऽयं लोकप्रियः सुप्रसिद्धश्च । अस्यार्थः – वयं सर्वे सन्तोषेण जीवाम । वयं सहैव सुखदुःखानि अनुभवाम, वयं सहैव राष्ट्रं समर्थं करवाम, वयं क्रियमाणं कर्म संयक् करवाम । वयं परस्परं न कदापि विद्विषामहै । सर्वान् जनान् वयं प्रीणयाम”– इति ।।

एतादृशाः शताधिकाः शान्तिमन्त्राः वेदेषु विश्वशान्तिं विश्वप्रेम च उपदिशन्ति । अतः ईदृशानां शान्तिमन्त्राणां सारभूतानां वेदानां रक्षा अस्माभिः अवश्यं कार्या । एतान् सन्देशान् मनसा अनुसन्दधाम। वेदैः दर्शिते मार्गे सर्वदा सर्वथा च वयं सञ्चराम, विश्वशान्तिं विश्वकल्याणं च सन्ततं अनुभवाम ।।

## अभ्यासः

### I. कठिनशब्दार्थः -

1. विश्वम् – universe
2. वर्धयितुम् – to develop
3. शान्तिः – peace
4. प्रार्थना – prayer
5. आत्मा – soul
6. सौहार्दता – friendship
7. मार्गः – path
8. मङ्गलम् – auspicious



Unit 12.indd 80 06-06-2018 12:45:21

## II. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. वयं कथं विश्वशान्तिं वर्धयितुं शक्नुमः ?

2. शान्तिः कस्य आवश्यकी ?

3. प्रार्थना कति विधा ?

4. स्वार्थप्रार्थना नाम का ?

5. सामूहिकप्रार्थना किमर्थं क्रियते ?

6. वैयक्तिप्रार्थनायां किं भवति ?

7. वयं कीदूशीं वाचं शृणुयाम ?

8. वयं कैः देवान् प्रीतिं कुर्मः ?

9. वयं सर्वदा किं पश्येम?

10. वयं सर्वे कथं जीवेम ?

11. केषां रक्षां अस्माभिः अवश्यं कर्तव्या?

## III. सविस्तरेण उत्तरं कुरुत-

1.“भद्रं कर्णेभिः” इति मन्त्रं लिखित्वा अस्य तात्पर्यं च लिखत ।

2. यजुर्वेदोक्तं विश्वशान्तिमन्त्रं विवृणुत ।

## IV. घटनाक्रमानुसारं लिखत-

1. मा विद्विषावहै ।

2. सह नौ भुनक्तु ।

3. तेजस्विनावधीतमस्तु ।

4. सह नाववतु ।

5. सह वीर्यं करवावहै ।

## V. अधो प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत-

सर्वथा, परस्परं, सदा, अपि, इति

1. विश्वशान्तिः स्वार्थप्रार्थना परार्थप्रार्थना _______ द्विविधा।
2. वयं _______ मङ्गलां शुभां कल्याणीमेव वाचं शृणुयाम।
3. वयं सर्वदा _______ स्थिरैः इन्द्रियैः देवान् युष्मान् तुष्टुवांसः।
4. वयं _______ न कदापि विद्विषावहै।
5. वेदैः दर्शिते मार्गे _______ वयं सञ्चराम।

## VI. "आम्" अथवा "न" इति लिखत-

1. जगति न हि कोऽपि दुःखम् इष्टत्वेन काम्यते। _______________
2. शान्तिः केवलम् एकस्य जनस्य आवश्यकी। _______________
3. स्वार्थप्रार्थनायाः अपि परार्थप्रार्थनायाः शक्तिस्तु अधिका भवति। __________
4. वयं सदा मङ्गलां शुभां कल्याणीमेव वाचं न शृणुयाम। _____________
5. शताधिकाः शान्तिमन्त्राः वेदेषु विश्वशान्तिं विश्वप्रेम च उपदिशन्ति। _________

## VII. अधो लिखितानां शब्दानां समानार्थकं कोष्ठात् चित्वा लिखत-

1. जगति ________________ (विश्वे / गिरौ)
2. दुःखम् ________________ (सुखम् / खेदः)
3. जनाः ________________ (प्रजाः / राजा)
4. देवाः ________________ (असुराः / अमराः)
5. राष्ट्रम् ________________ (देशः / वनम्)



Unit 12.indd 82 06-06-2018 12:45:21

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### समानान्तरप्रयोगः

मेधां मे वरुणो ददातु, मेधाग्निः प्रजापतिः।
मेधामिन्द्रश्च वायुश्च, मेधां धाता ददातु मे ।।
वरुणः मह्यम् बुद्धिं ददातु, अग्निः प्रजापतिः अपि मह्यं बुद्धिं ददातु ।
विश्वस्य धारणकर्ता ईश्वरः अपि मह्यम् बुद्धिं ददातु ।।
शं नो मित्रा, शं नो भवत्वर्य्यमा,
शं न इन्द्रो बृहस्पतिः, शं नो विष्णुरुरुक्रमः ।।
यतो यतः समीहसे, ततो नो अभयं कुरु ।
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ।।
ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम् ।।
मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे ।
मित्रस्य चक्षुषा वयं सर्वाणि भूतानि समीक्षामहे ।।
शं नः सूर्य उरुचक्षा उदेतु,
शं नश्चतस्रः प्रदिशो भवन्तु ।
शं नः पर्वता ध्रुवयो भवन्तु,
शं नः सिन्धवः शमु सन्त्वापः ।।
।। संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।।

### Weblinks :

1. https://hi.in.wikipedia.org/wiki/विश्वशान्ति
2. https://www.linkedin.com/pulse/विश्वशान्तिः



Unit 12.indd 83 06-06-2018 12:45:21

## व्याकरण–अभ्यासः - 6

### धातुः - आत्मनेपदी - लङ् (Past Tense)

#### सेव् – to serve

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | असेवत | असेवेताम् | असेवन्त |
| मध्यमपुरुषः (II Person) | असेवथाः | असेवेथाम् | असेवध्वम् |
| उत्तमपुरुषः (III Person) | असेवे | असेवावहि | असेवामहि |

#### यत् – to try

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | अयतत | अयतेताम् | अयतन्त |
| मध्यमपुरुषः (II Person) | अयतथाः | अयतेथाम् | अयतध्वम् |
| उत्तमपुरुषः (III Person) | अयते | अयतावहि | अयतामहि |

#### मुद् (मोद्) – to please

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | अमोदत | अमोदेताम् | अमोदन्त |
| मध्यमपुरुषः (II Person) | अमोदथाः | अमोदेथाम् | अमोदध्वम् |
| उत्तमपुरुषः (III Person) | अमोदे | अमोदावहि | अमोदामहि |



Unit 12.indd 84 06-06-2018 12:45:22

# अनुच्छेदलेखनम् - 6

## (Comprehension – 6)

पुरा अशोकः नाम महाराजः भारतवर्षस्य आधिपत्यं अवहत् । सोऽयं चन्द्रगुप्तमौर्यस्य पौत्रः, बिन्दुसारस्य पुत्रः च आसीत् । श्रीरामः इव प्रजानां ऐहिकं आमुष्मिकं च योगक्षेमं व्यचिन्तयत्। प्रथमतः अशोकः तावत् समरप्रियः आसीत् । पश्चात् कलिङ्कसमरस्य विजयेन स्वीयं राज्यम् महत्तरं कर्तुं चिन्तितवान् । सन्नद्धः सहायश्च ततः तथैव चकार ।।



प्रश्नाः -

1. अशोकः कस्य आधिपत्यं अवहत्?
2. चन्द्रगुप्तमौर्यस्य पौत्रः कः?
3. आदौ अशोकः कीदृशः आसीत्?
4. अशोक: किं कर्तुं चिन्तितवान् ?
5. अशोकः कः इव योगक्षेमं व्यचिन्तयत्?

# अनुवादः – 6

## (Translation - 6)

अर्जुनः युद्धे गुरून्, बन्धून्, मित्राणि च अपश्यत्। तान् च दृष्ट्वा तस्य हृदयम् अद्रवत्। दीनः अर्जुनः श्रीकृष्णं करुणम् अभाषत –"अहं कथं गुरून् बन्धून् च बाणैः प्रहरामि? यदि प्रहरामि, तदा हिंसा भवति। यदि न प्रहरामि, धर्महानिः। किम् अहं करोमि? त्वम् एव माम् उपदिश" इति। श्रीकृष्णः अभाषत –"हे पार्थ, त्वं क्षत्रियः असि। अतः त्वम् क्षत्रियाणां धर्मम् अनुसर। प्रजापालनं हि क्षत्रियाणां धर्मः। अतः दुष्टान् निषूदयस्व। साधून् रक्ष। युद्धात् मा पलायस्व। शत्रून् पराजयस्व। राज्यं सुखं च लभस्व। यदि त्वं धर्मेण वर्तसे, तदा लोकः अपि धर्मेण वर्तते" इति।।



Unit 12.indd 85 06-06-2018 12:45:22